# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– शास्त्री (SEM-1) | **प्रश्नपत्रम्**–७ (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड**- **CE- 1-1-1** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – २१/१२/२०१८ | **सन्दर्भग्रन्थः**– भागवते माहात्म्यम् एवं प्रथमस्कन्धः | |

---

**॥ प्रथमान्वितिः ॥**

**प्र–१ कयोश्चिद् द्वयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या ।** **१०**

१. यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥

२. भाग्योदयेन बहुजन्मसमर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै ।
अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदोदयते विवेकः ॥

३. भवद्भिरद्यैव कृतास्मि पुष्टा कलिप्रणष्टापि कथारसेन ।
क्वाहं तु तिष्ठाम्यधुना ब्रुवन्तु ब्राह्मा इदं तां गिरमूचिरे ते ॥

**प्र–२ कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत ।** **१०**

१. भागवतकथाश्रवणविधिं वर्णयत ।

२. गोकर्णोपाख्यानं वर्णयत ।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ कयोश्चिद् द्वयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या ।** **१०**

१. निगमकल्पतरोर्गलितं फलं शुकमुखादमृद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥

२. अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ।
तन्मूलमव्यक्तमगाधबोदं पृच्छामहे त्वाऽऽत्मभवात्मभूतम् ॥

३. स देवदेवो भगवान् प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम् ।
प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्यानपथश्चतुर्भुजः ॥

**प्र–४ कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत ।** **१०**

१. चतुर्विंशत्यवताराणां संक्षेपेण वर्णनं कुरुत ।

२. भीष्मस्तुतिं वर्णयत ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ कयोश्चिद् द्वयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या ।** **१०**

१. स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ।
अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलतात्मन्निशि सुप्तशक्तिषु ॥

२. एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः ।
छित्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसंदर्शिताध्वा ॥

३. तत्राभवद्भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ।
अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥

**प्र-६ कयोश्चिद् द्वयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या ।** **१०**

१. परीक्षिता कृतं कलिदमनं वर्णयत ।

२. श्रीकृष्णस्य द्वारिकागमनप्रसङ्गं वर्णयत ।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ दशानां लघूत्तराणि लिखत ।** **१०**

१. श्रीमद्भागवतमहापुराणस्य रचयिता कः ?

२. पुराणानां संख्या कति?

३. माहात्म्ये कति अध्यायाः?

४. पुराणशब्दस्य व्युत्पत्तिः का?

५. गोकर्णस्य पितुः नाम किम्?

६. वेदव्यासस्य पितुः नाम किम्?

७. भगवतः कति अवताराः सन्ति?

८. आत्मदेवाय यत् ज्ञानं दत्तं तत् किं कथ्यते?

९. पुराणस्य लक्षणं किम्?

१०. महापुराणस्य लक्षणं किम्?

११. व्यासाय भागवतज्ञानं कः ददाति?

१२. पुराणस्य मङ्गलाचरणात्मकः श्लोकः कः ?

१३. भागवतस्य मुख्यवक्ता कः ?

१४. वक्तुः लक्षणात्मकः श्लोकः कः ?

१५. भीष्मस्तुतेः छन्दः किम्?

--००--